छन्ते। इर्, अच्छदत् अच्छर्दीत्। देवनं जिगीषेच्छाव्यवहारस्तुतिद्युतिक्रीड़ागतयः। इति केचित्। स्वमते तु क्रीड़नमेव अन्यथा लिपो ग्रहणमनर्थकं स्यात्। लिपि दीप्तौ। इति दुर्गादासः॥

छेकः, त्रि, ( छ्यति वनवासादिसुखं छिनत्ति नाश्रयतीति। छो य लूनौ + बाहुलकात् डेकन्।) गृहासक्तपक्षिमृगौ। तत्पर्य्यायः। गृह्यकः २। इत्यमरः। २।६।४३॥ नागरः। इति मेदिनी। के, २४॥ (शब्दालङ्कारविशेषे, पुं। स तु अनुप्रासभेदः। तल्लक्षणं यथा, साहित्यदर्पणे।१०।४।
"छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा॥"
तदुदाहरणं यथा, तत्रैव,—
"आदाय वकुलगन्धानन्धीकुर्व्वन् पदे पदे [भ्रमरान्।
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः॥"
अत्र गन्धानन्धीति संयुक्तयोः कावेरीवारीत्यसंयुक्तयोः पावनः पवन इति बहूनां व्यञ्जनानां सकृदावृत्तिः। छेको विदग्धस्तत्प्रयोज्यत्वादेष छेकानुप्रासः॥")

छेकोक्तिः, स्त्री, ( छेकानां विदग्धानां उक्तिः।) वक्रोक्तिः। इति जटाधरः॥ (विशेषस्तु वक्रोक्तिशब्दे ज्ञेयः॥)

छेद, त् क छेदे। इति कविकल्पद्रुमः॥ (अदन्त चुरां-परं-सकं-सेट्।) अचिच्छेदत्। इति दुर्गादासः॥

छेदः, पुं, ( छिद + भावे घञ्।) छेदनम्। इति हेमचन्द्रः। ३। ३६॥ (यथा, कुमारे।२।४१।
"तेनामरवधूहस्तैः सदयालूनपल्लवाः।
अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः॥"
नाशः। अपगतिः। यथा, शाकुन्तले २य अङ्के।
"मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः॥"*॥
छिद्यते इति। छिद् + कर्म्मणि घञ्।) खण्डम्। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। १।४।
"बलाहकच्छेदविभक्तरागा-
मकालसन्ध्यामिव धातुमत्ताम्॥")

छेदनं, क्ली, (छिद् + भावे ल्युट्।) अस्त्रेण द्विधा करणम्। तत्पर्य्यायः। वर्द्धनम् २। इत्यमरः। ३।२।७॥ कर्त्तनम् ३ कल्पनम् ४ छेदः ५। इति हेमचन्द्रः॥ (यथा, मनुः। ११।१४२।
"फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम्॥"
नाशः। अपनोदनम्। यथा, महाभारते। ३।१८५।२४।
"श्रुत्वैव तु महात्मानो मुनयोऽभ्यद्रवन् द्रुतम्।
सनत्कुमारं धर्म्मज्ञं संशयच्छेदनाय वै॥"*॥)
भेदः। इति मेदिनी। ने, ६५॥ (छिनत्तीति। छिद् + ल्युः। छेदके, त्रि। यथा, महाभारते। २।५४।६।
"प्रच्छन्नो वा प्रकाशो वा योगो योऽरिं प्रबाधते।
तद्वै शस्त्रं शस्त्रविदां न शस्त्रं छेदनं स्मृतम्॥"
तथाच तत्रैव। १।३३।३।
"ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम्।
घोररूपं तदत्यर्थं यन्त्रं देवैः सुनिर्म्मितम्॥")

छेदनीयः, पुं, ( छेदितुं योग्यः। छेद + "अर्हे-कृत्यतृचश्च।" ३।३।१६९। इति अनीयर्।) कतकवृक्षः। इति राजनिर्घण्टः॥ (कतकशब्देऽस्य गुणादयोऽस्य ज्ञातव्याः॥) छेद्ये, त्रि॥ (यथा, सुश्रुते। १।२७।
"अनुत्थित शल्यानि छेदनीयमुखानि च॥")

छेदिः, त्रि, ( छिनत्तीति। छिद् + "कृपिषि-रुहीति।" उणां ४।११८। इति इन्।) छेदनकर्त्ता। इत्युणादिकोषः॥

छेदितं, त्रि, ( छेद त् क छेदे + क्त।) छिन्नम्। इति हेमचन्द्रः॥ (यथा, काशीखण्डे।२६।६२।
"छेदिताखिलपापौघा कृशानी कुलहारिणी॥")

छेमण्डः, पुं, ( छम अदने + बाहुलकात् अण्डन् अत एत्वञ्च।) पितृहीनः। इत्युणादिवृत्तिः। १।१२८। छेमड़ा इति भाषा॥

छेलुः, पुं, सोमराजी। इति शब्दचन्द्रिका॥

छो, य लूनौ। इति कविकल्पद्रुमः॥ (दिवां-परं-सकं-अनिट्।) लूनिश्छेदः। य, छ्यति धान्यं लोकः। इति दुर्गादासः॥

छोटिका, स्त्री, ( छटति यत्नविघ्नकारिणीं मायां छिनत्तीति। छुट + ण्वुल्। टापि अत इत्वञ्च।) तर्ज्जन्यङ्गुष्ठाङ्गुलिध्वनिः। यथा, "छोटिकाभिर्दशदिग्बन्धनं कृत्वा भूतशुद्धिं कुर्य्यात्।" इति तन्त्रसारः॥

छोटी [न्] पुं, ( छुटति नीचजातितया खण्डीभवतीति। छुट + णिनिः।) कैवर्त्तः। इति त्रिकाण्डशेषः॥

छोरणं, क्ली, ( छुर + भावे ल्युट्।) परित्यागः। इति त्रिकाण्डशेषः॥ छोड़न इति हिन्दी भाषा॥

छोलङ्गः, पुं, ( छुरतीति। छुर + बाहुलकात् अङ्गच्। ततो रस्य लत्वम्।) मातुलुङ्गः। इति शब्दरत्नावली॥ टाबालेबु इति भाषा॥

छ्वु, ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) ङ, छ्वते। इति दुर्गादासः॥

---

# ज

ज, जकारः। स व्यञ्जनाष्टमवर्णः। चवर्गतृतीयवर्णश्च। अस्योच्चारणस्थानं तालु। इति व्याकरणम्॥ (यदुक्तं सिद्धान्तकौमुद्याम्। "इचुयशानां तालु।" तथाच शिक्षायाम्।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू॥")
अस्योत्पत्तिर्यथा, प्रपञ्चसारे।
"विसर्गस्तानुगः सोमो शं चवर्गश्च यन्तथा॥"
(वङ्गाक्षरेण) अस्य लेखनप्रकारो यथा, वर्णोद्धारतन्त्रे।
"ऊर्द्धाधःकुञ्चिता रेखा तासु मध्यगतं विशः।
वागदेवी कमला निद्रा द्विधा मात्रा प्रकीर्त्तिता॥"
अस्य स्वरूपं यथा, कामधेनुतन्त्रे।
"जकारं परमेशानि! या स्वयं मध्यकुण्डली।
शरच्चन्द्रप्रतीकाशं सदा त्रिगुणसंयुतम्॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये!॥"
तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे।
"ध्यानमस्याः प्रवक्ष्यामि शृणुष्व कमलानने!।
नानालङ्कारसंयुक्तां भुजैर्द्वादशभिर्युताम्॥
रक्तचन्दनदिग्धाङ्गीं विचित्राम्बरधारिणीम्।
त्रिलोचनां जगद्धात्रीं वरदां भक्तवत्सलाम्॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्॥"
तस्य पर्य्याया यथा,—
"जः शवो वानरः शूली भोगदा विजया स्थिरा
ललदेवो जयो जेता धातकी सुमुखी विभुः॥
लम्बोदरी स्मृतिः शाखा सुप्रभा कर्णिकाधरा।
दीर्घबाहू रुचिर्हंसो नन्दी तेजाः सुराधिपः॥
जवनो वेगितो वामो मानवाचः सदात्मकः।
कुम्भारुतेश्वरो वेगी चामोदो मदविह्वलः॥"
इति नानातन्त्रम्॥
(धातुपाठेऽनुबन्धविशेषः। यथा, कविकल्पद्रुमे।
"जो ज्वलादौ निरस्तस्तुः साधुर्दुक्षिमक्-युतः॥"
छन्दःशास्त्रोक्तमध्यगुरुगणविशेषः। (।ऽ।) यदुक्तं छन्दोमञ्जर्य्याम्।
"जो गुरुमध्यगतो रलमध्यः॥" इति॥)

जः, पुं, ( जयति जायते वा। जि जन् वा + "अन्येष्वपि दृश्यते।" ३।२।१०१। इति डः।) मृत्युञ्जयः। जनिः। तातमात्रम्। जनार्द्दनः। इति मेदिनी। जे, १॥ विषम्। मुक्तिः। तेजः। पिशाचः। इति शब्दरत्नावली॥ वेगः। इत्येकाक्षरकोषः॥

जः, त्रि, ( जयति विपक्षमिति। जि + डः।) जेता। वेगितः। इति शब्दरत्नावली॥

जकुटं, क्ली, (जं जातं सत् कुटति वक्रीभवतीति। कुट कौटिल्ये + "इगुपधज्ञेति।"३।१।१३५। इति कः।) वार्त्ताकुपुष्पम्। इति मेदिनी॥ टे, ४३॥

जकुटः, पुं, ( जो जातः सन् कुटतीति। कुट + कः।) मलयपर्व्वतः। कुक्कुरः। इति मेदिनी॥ टे, ४३॥

जक्ष, इ म ङ दाने। गतौ। इति कविकल्पद्रुमः॥ ( भ्वां-आत्मं-सकं-सेट्।) इ, जङ्क्ष्यते। न मध्यपाठे नैवेष्टसिद्धे इदनुबन्धो वेदेषूच्चारणभेदार्थः। म, अजङ्क्षि अजाङ्क्षि जङ्क्षं जङ्क्षं जाङ्क्षं जाङ्क्षं अनुबन्धबलादनुपधाया अपि दीर्घः। चमते तु अत्र दीर्घविधिरुपधां नापेक्षते। ङ, जङ्क्षते। इति दुर्गादासः॥

जक्ष, क्ष लु घ भक्षे। हासे। इति कविकल्पद्रुमः॥ (अदां-परं-भक्षे सकं-हासे-अकर्म्म-सेट्।) केचित्तु विष्णुपुराणे यक्षराक्षसोत्पत्तिप्रसङ्गे यक्ष्यतामिति यैरुक्तं ते वै यक्षास्तु यक्षणादिति भक्षणार्थस्यैव यक्षशब्दव्युत्पादनादेतमन्तःस्थादिं मन्यन्ते॥ तत्र अमरटीकायां वर्ग्य-